पटरकः, पुं, (पटर+स्वार्थे कन् ।) गुन्द्रतृणः । इति राजनिर्घण्टः ॥

पटलं, क्ली, (पटं विस्तृतं लाति । पट्+ला+"आतोऽनुपेति" ।३।२।३। कः । यद्वा पटतीति । पट+"कृषादिभ्यश्चित् ।" उणां ।१।१०८। इति कलच् ।) छदिः । चाल इति भाषा । नेत्ररोगः । इत्यमरः ।३।३।२०० ॥ पिटकः । परिच्छदः । तिलकः । (यथा, कलाविलासे । १ । २५ ।
"अस्तमिते दिवसकरे तिमिरभरद्विरदसंसक्ता । सिन्दूरपटलपाटलकान्तिरिवाभे बभौ सन्ध्या ॥")
समूहे क्ली स्त्री । इति मेदिनी ॥ (यथा, भागवते । ३ । १४ । २६ ।
"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं बिभित्सवः ।
निरस्तसाम्यातिशयोऽपि यत् स्वयं
पिशाचचर्य्यामचरत् गतिः सताम् ॥")
दृष्टिरोधकम् । चक्षुर परदा इति भाषा । यथाह माधवकरः ।
"प्रथमे पटले दोषो यस्य दृष्ट्या व्यवस्थितः । अव्यक्तानि सरूपाणि कदाचिदथ पश्यति ॥"
दृष्टौ चत्वारि पटलानि । रसरक्ताश्रयं बाह्यं द्वितीयं मांससंश्रयं तृतीयं मेदःसंश्रितं चतुर्थं कालकास्थिसंश्रितम् । तथा च सुश्रुतः ।
"तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् । मेदस्तृतीयं पटलमाश्रितं त्वस्थि चापरम् । पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते ॥"
इति । अत्र तेजःशब्देन रक्तं जलशब्देन रसो व्याख्यातः । तेषु पटलेषु बाह्यादिभेदेनाधिष्ठानविशेषप्रभावात् दोषाणां लिङ्गविशेषमाह प्रथमे पटले इत्यादि । प्रथमे पटले सर्व्वाभ्यन्तरे न तु बाह्ये । इति विजयरक्षितः ॥

पटलः, पुं, स्त्री, (पाटयति दीप्यते यः । पट्+कलच् ।) वृन्दः । ? इति शब्दरत्नावली ॥ वृन्दस्थाने वृन्दोऽपि पाठः ॥

पटलप्रान्तं, क्ली, (पटलस्य छदिषः प्रान्तम् ।) गृहचालिकान्तभागः । छाँचि इति भाषा । तत्पर्य्यायः । वलीकम् २ नीध्रम् ३ । इत्यमरः । २ । २ । १४ ॥

पटली, स्त्री, (पटल+ङीष् ।) छदिः । इति भरतहेमचन्द्रौ । चाल इति भाषा ॥

पटवापः, पुं, (पट उप्यते प्राचुर्य्येण दीयते यत्र । पट+वप्+घञ् ।) वस्त्रगृहम् । इति त्रिकाण्डशेषः ॥

पटवासः, पुं, (पटस्य पटनिर्म्मितो वा वासः गृहम् ।) वस्त्रगृहम् । शाटी । इति शब्दरत्नावली ॥

पटवासकः, पुं. पटो वास्यतेऽनेनेति घञि पटवासः ततः स्वार्थे कन् । पटवासचूर्णम् । तत्पर्य्यायः । पिष्टातः २ । पिष्टेन कुङ्कुमचूर्णादिना अततीति पिष्टातः पचाद्यच् । इत्यमरभरतौ ॥

पटहं, क्ली पुं, (पटेन हन्यते इति । पट+हन्+ड ।) पटत्शब्दं जहाति पटहः वा निपातनात् तलोपः । इति भरतः ॥ आनकवाद्यम् । इत्यमरः । १ । ७ । ६ ॥

पटहः, पुं, (पट इत्यस्फुटं शब्दं जहाति त्यजतीति । पट+हा+ड ।) पाटयति गमयति योधान् युद्धाय उत्साहवर्द्धकत्वात् पट गतौ नाम्नीति अहः । इति भरतः ॥ युद्धे वाद्यमानढक्का । तत्पर्य्यायः । आडम्बरः २ । इत्यमरः । २ । ८ । १०८ ॥ समारम्भः । हिंसनम् । इति शब्दरत्नावली ॥

पटाकः, पुं, (पटति गच्छतीति । पट्+निपातनात् आकः ।) पक्षिविशेषः । इत्युणादिकोषः ॥

पटाका, स्त्री, (पटाक+टाप् ।) पताका । इति शब्दरत्नावली ॥

पटालुका, स्त्री, (पट इव अलतीति । पट्+बाहुलकात् उकः ततष्टाप् ।) जलौका । इति त्रिकाण्डशेषः ॥

पटिः, स्त्री, (पट+इन् ।) पटभेदः । वाशुलिः । कुम्भिकाद्रुमः । इति मेदिनी ॥

पटिका, स्त्री, (पटि+स्वार्थे कन् ततः टाप् ।) पटिः । वस्त्रम् । यथा, लीलावती । [क्षे-
"विस्तारे त्रिकराः कराष्टकमिता दैर्घ्ये विचित्राश्च चेद्रूपैरुत्कटपट्टसूत्रपटिका अष्टौ लभन्ते शतम् । दैर्घ्ये सार्द्धकरत्रया परपटी हस्तार्द्धविस्तारिणी ताड़क् किं लभते द्रुतं वद वणिक् वाणिज्यकं वेत्सि चेत् ॥"

पटिष्ठः, त्रि, (अयमेषामतिशयेन पटुः । पटु+"अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटी, स्त्री, (पट+इन् । वा ङीप् ।) वस्त्रभेदः । इति शब्दरत्नावली । यवनिका । इति त्रिकाण्डशेषः ॥

पटीयान्, [स्] त्रि, (अयमेषामतिशयेन पटुः । पटु+"द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटीरं, क्ली, (पटतीति । पट गतौ । "कॄ पॄ कटिपटिशौटिभ्य ईरन् ।" उणां । ४ । ३० । इति ईरन् ।) तितउः । शृङ्गम् । मूलकम् । केदारः । वारिदः । वेणुसारः । वातिकः । चन्दनम् । इति शब्दरत्नावली ॥ खदिरम् । उदरम् । कन्दर्पः । हरबीयम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पटु, क्ली, (पाटयति । पट गतौ ण्यन्तः । "फलिपाटीति ।" उणां ।१।१८। इति उः पटादेशश्च ।) छत्रा । लवणम् । इति मेदिनी ॥ पांशुलवणम् । इति रत्नमाला ॥

पटुः, पुं, (पाटयतीति । पट्+णिच्+"फलिपाटीति ।" उणां । १ । १८ । इति उः पटादेशश्च ।) पटोलः । इत्यमरः । २ । ४ । १५५ ॥ पटोलपत्रम् । इति विश्वः ॥ काञ्चीरलता । कारवेल्लः । चोरकः । इति राजनिर्घण्टः ॥

पटुः, त्रि, (पाटयतीति । पट गतौ । ण्यन्तः । "फलिपाटीति ।" उणां । १ । १८ । इति उः पटादेशश्च ।) दक्षः । (यथा, रघुः । ९ । ४६ ।
"अनुभवन् नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे
भुजलतां जड़तामबलाजनः ॥")
नीरोगः । चतुरः । इति मेदिनी ॥ (मधुरः । यथा, रघुः । ९ । ७३ ।
"कुम्भपूरणभवः पटुरुच्चै-
रुच्चचार निनदोऽम्भसि तस्याः ॥")
तीक्ष्णः । स्फुटः । इति हेमचन्द्रः ॥ निष्ठुरः । इति जटाधरः ॥ धूर्त्तः । इति त्रिकाण्डशेषः ॥

पटुकः, पुं, (पटु+स्वार्थे कन् ।) पटोलः । इति शब्दरत्नावली ॥

पटुकल्पः, त्रि, ईषदूनः पटुः । (पटु+कल्पप् ।) इति व्याकरणम् ॥

पटुजातीयः, त्रि, पटुप्रकारः । (पटु+जातीयर् ।) इति व्याकरणम् ॥

पटुतृणकं, क्ली, (पटु लवणं तत्प्रचुरं तृणम् । ततः कन् ।) लवणतृणम् । इति राजनिर्घण्टः ॥

पटुपत्रिका, स्त्री, (पटु पत्रमस्याः कप् । टापि अत इत्वम् ।) क्षुद्रचञ्चुक्षुपः । इति राजनिर्घण्टः ॥

पटुपर्णिका, स्त्री, (पटु पर्णमस्याः । कप् टाप् अत इत्वञ्च ।) चोरिकोद्दयः । इति राजनिर्घण्टः ॥

पटुपर्णी, स्त्री, (पटुपर्ण+"पाककर्णपर्णपुष्पफलेति ।" ४।१।६४ । इति ङीष् ।) स्वर्णक्षीरी । इत्यमरः । २ । ४ । १३८ ॥

पटुरूपः, त्रि, (प्रशस्तः पटुः । पटु+रूपप् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटोटजं, क्ली, (पटस्य छदिषः उटे तृणादौ जायते यत् । "सप्तम्यां जनेर्डः ।" ३।२।९७ । इति डः ।) छत्राकः । इति शब्दरत्नावली ॥

पटोलं, क्ली, (पट गतौ+"कपिगडिगण्डीति ।" उणां ।१।६७। इति ओलच् ।) वस्त्रभेदः । इति मेदिनी ॥ तत्तु गुर्ज्जरदेशीयविचित्रपट्टवस्त्रम् ॥

पटोलः, पुं, (पटति बहुगुणान् प्राप्नोतीति । पट गतौ+"कपिगडिगण्डीति ।" उणां १ । ६७ । इति ओलच् ।) स्वनामप्रसिद्धलतिकाफलम् । पलवल इति हिन्दी भाषा ॥ (यथा, पञ्चतन्त्रे १ । ४०९ ।
"साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः । पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥")
तत्पर्य्यायः । कुलकम् २ तिक्तकः ३ पटुः ४ । इत्यमरः । २।४।१५५ ॥ कर्कशदलः ५ कुलजः ६ वाजिमान् ७ लताफलः ८ राजफलः ९ वरतिक्तः १० अमृताफलः ११ । इति रत्नमाला ॥ कटुफलः १२ कटुकः १३ कर्कशच्छदः १४ राजनामा १५ अमृतफलः १६ पाण्डुः १७ पाण्डुफलः १८ बीजगर्भः १९ नागफलः २० कुष्ठारिः २१ कासमर्द्दनः २२ पञ्जरः २३ आजीफलः २४ ज्योत्स्नी २५ कच्छुघ्नी २६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारकत्वम् । पित्तबलाशकफकण्डूतिकुष्ठास्रग्ज्वरदाहार्त्तिनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।